শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে চতুরশীতিতমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে চতুরশীতিতমং দশকম্॥

## সূর্যগ্রহণযাত্রাৱর্ণনম্

ক্বচিদথ তপনোপরাগকালে
 পুরি নিদধৎ কৃতৱর্মকামসূনূ।
যদুকুলমহিলাৱৃতঃ সুতীর্থং
 সমুপগতোঽসি সমন্তপঞ্চকাখ্যম্॥ **84.1** ॥

বহুতরজনতাহিতায তত্র
 ৎৱমপি পুনন্ ৱিনিমজ্য তীর্থতোযম্।
দ্বিজগণপরিমুক্তৱিত্তরাশিঃ
 সমমিলথাঃ কুরুপাণ্ডৱাদিমিত্রৈঃ॥ **84.2** ॥

তৱ খলু দযিতাজনৈঃ সমেতা
 দ্রুপদসুতা ৎৱযি গাঢভক্তিভারা।
তদুদিতভৱদাহৃতিপ্রকারৈঃ
 অতিমুমুদে সমমন্যভামিনীভিঃ॥ **84.3** ॥

তদনু চ ভগৱন্ নিরীক্ষ্য গোপা -
 নতিকুতুকাদুপগম্য মানযিৎৱা।
চিরতরৱিরহাতুরাঙ্গরেখাঃ
 পশুপৱধূঃ সরসং ৎৱমন্ৱযাসীঃ॥ **84.4** ॥

সপদি চ ভৱদীক্ষণোৎসৱেন
 প্রমুষিতমানহৃদাং নিতম্বিনীনাম্।

অতিরসপরিমুক্তকঞ্চুলীকে
 পরিচযহৃদ্যতরে কুচে ন্যলৈষীঃ॥ **84.5**॥

রিপুজনকলহৈঃ পুনঃ পুনর্মে
 সমুপগতৈরিযতী ৱিলম্বনাঽভূৎ।
ইতি কৃতপরিরম্ভণে ৎৱযি দ্রা -
 গতিৱিৱশা খলু রাধিকা নিলিল্যে॥ **84.6**॥

অপগতৱিরহৱ্যথাস্তদা তা
 রহসি ৱিধায দদাথ তত্ত্ববোধম্।
পরমসুখচিদাত্মকোঽহমাত্মে -
 ত্যুদযতু ৱঃ স্ফুটমেৱ চেতসীতি॥ **84.7**॥

সুখরসপরিমিশ্রিতো ৱিযোগঃ
 কিমপি পুরাঽভৱদুদ্ধৱোপদেশৈঃ।
সমভৱদমুতঃ পরং তু তাসাং
 পরমসুখৈক্যমযী ভৱদ্বিচিন্তা॥ **84.8**॥

মুনিৱরনিৱহৈস্তৱাথ পিত্রা
 দুরিতশমায শুভানি পৃচ্ছ্যমানৈঃ।
ৎৱযি সতি কিমিদং শুভান্তরৈরি -
 ত্যুরুহসিতৈরপি যাজিতস্তদাঽসৌ॥ **84.9**॥

সুমহতি যজনে ৱিতাযমানে
 প্রমুদিতমিত্রজনে সহৈৱ গোপাঃ।
যদুজনমহিতাস্ত্রিমাসমাত্রং
 ভৱদনুষঙ্গরসং পুরেৱ ভেজুঃ॥ **84.10**॥

ৱ্যপগমসমযে সমেত্য রাধাং
 দৃঢমুপগূহ্য নিরীক্ষ্য ৱীতখেদাম্।

প্রমুদিতহৃদযঃ পুরং প্রযাতঃ
পৱনপুরেশ্ৱর পাহি মাং গদেভ্যঃ ॥ **84.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে চতুরশীতিতমং দশকং সমাপ্তম্ ॥